# संस्कृत-वार्ता:

दिनाङ्क : 01/07/2025
सायम् : 06:20 pm

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचक: - कृष्णप्रसाद:**

**आदौ-मुख्यवार्ता:**

- केन्द्रीयमन्त्रिमण्डलेन प्रायः एकलक्ष-कोटिरूप्यकाणां वृत्ति-सम्बद्ध-प्रोत्साहन-योजना अनुमोदिता, येन देशे वृत्ति-सृजनस्य वृद्धिः भविष्यति सहैव हि अनुसंधान-विकास-नवान्वेषण-योजनाः अपि अनुमोदिताः।
- राष्ट्रम् डिजिटल्-इण्डिया इत्यस्य दशवर्षोत्सवं परिपालयति; प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् एतत् अभियानं अधुना जनान्दोलनरूपेण, आत्मानिर्भरभारतस्य निर्माणस्य च कुञ्जीभूतास्तीति।
- भारत-पाकिस्तान-देशौ परस्परं नागरिक-बन्धितानां मत्स्यजीवीनाञ्च सूचेः विनिमयं कुरुत:।
- अमरीका-देशः भारत-प्रशान्तप्रदेशे भारतम् सामरिकसहयोगी इति अमन्यत्; एकः प्रमुखः व्यापार-व्यवहारः प्रायः घोषितः भविष्यति इति कथयति च।
- महिला-क्रिकेट्-क्रीडायां अद्य रात्रौ ब्रिस्टल्-नगरे द्वितीयायां टि-20- इति अन्ताराष्ट्रिय-क्रीडायां आतिथेय-इङ्ग्लेण्ड्-देशेन सह भारतं क्रीडिष्यति।

**अथवार्ता: विस्तारेण**

**मन्त्रिमण्डलस्य निर्णया:**

केन्द्रीयमन्त्रिमण्डलेन सर्वक्षेत्रेषु वृत्तिसृजनमुद्दिश्य, सामाजिकसुरक्षां प्रदातुञ्च, विशेषावधानेन विनिर्माणक्षेत्रे वृत्ति-सम्बद्ध-प्रोत्साहन-योजना अनुमोदिता अस्ति। अद्य नवदेहल्यां मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, प्रथमतया कार्यं कुर्वाणः कर्मचारिणः योजनान्तर्गतं एकमासस्य वेतनं पञ्चदश-

एतत् विश्वविद्यालयं स्वास्थ्यपर्यटनस्य नूतनगन्तव्यस्थानत्वेन विश्वं आकर्षयिष्यति। सः अवदत् यत् प्रत्येकस्मिन् मण्डले स्वास्थ्याय शतशय्यायुतं स्वास्थ्य-कल्याण-केन्द्रं निर्मितं भविष्यतीति च।

**ऋतुविभागः**

भारततर्तुविज्ञानविभागेन अद्य छत्तीसगढ, बिहार, ओडिशा, पूर्वमध्यप्रदेश, हिमाचलप्रदेश, पश्चिमोत्तरप्रदेशेषु च अतिवृष्टेः पूर्वानुमानं कृतमस्ति। ऋतुविभागानुसारम् आगामिषु सप्तदिनेषु झारखण्डे, उपहिमालयीय-पश्चिमबङ्गे, सिक्किमे, मध्यप्रदेशे, छत्तीसगढे च अत्यधिकवृष्टिः भविष्यति। अद्य दक्षिणप्रायद्वीपीयभारते विशेषतः तेलङ्गाना-तटीय-कर्नाटक-राज्ययोः अपि एतादृशी स्थितिः अपेक्षितास्तीति।

**प्रधानमन्त्री-लेखं**

ऊर्जाक्षेत्रे भारतस्य यात्रायाः पुनः दृढीकरणमिति, नूतन-अक्षय-ऊर्जा-मन्त्रिणा प्रल्हाद-जोशी-वर्येण लिखितं लेखं दैनिक-वार्तापत्रेषु प्रसारयन् प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उक्तं यत् सौरशक्तिः वैश्विक-ऊर्जा-परिदृश्यं पुनः रूपयति, अन्ताराष्ट्रिय-सौर-सङ्घटनेन सम्पूर्णे विश्वे स्वच्छ-ऊर्जा-क्रान्तिः प्रेरिता अस्तीति। स्वस्य लेखे, श्रीजोशी अवदत् यत् भारतं सपादद्विशत गीगावाट् इति प्रायः नवीनीकरणीय-ऊर्जा-क्षमतां प्राप्नोदिति। सः इत्यपि अवदत् यत् एषा वृद्धिः प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे भारतस्य स्पष्टनीतेः विनियामकसंरचनायाः च कारणेन जायमानमस्तीति। प्रधानमन्त्रिणा नरेन्द्रमोदिना वित्तमन्त्रिणः निर्मला-सीतारामन् वर्यायाः एकं लेखम् अपि स्वीकृतम्, यस्मिन् उत्तम-सम्पर्कं, लद्दाखस्य लाभाय उपलभ्यमानानि प्रचुराणि संसाधनानि च अधोरेखितानि आसन्। स्वस्य लेखे तया उक्तमासीत् यत् केन्द्रशासितप्रदेशे उपलभ्यमानैः प्रचुरैः संसाधनैः लद्दाखराज्यम् कथं लाभम् आप्नोदिति सर्वत्र स्पष्टम् अस्ति। सा स्वलेखे इत्यपि अवोचत् यत् एतत् प्रधानमन्त्रिणः मोदिनः शासनस्य विशिष्टता अस्तीति।

**महिला-क्रिकेट्**

महिला-क्रिकेट्-क्रीडायां अद्य रात्रौ ब्रिस्टल्-नगरे द्वितीयायां टि-20- इति अन्ताराष्ट्रिय-क्रीडायां आतिथेय-इङ्ग्लेण्ड्-देशेन सह भारतं युद्ध्यति।

**।। इति वार्ताः ।।**